**2.3.4 संस्थान शिक्षण की गुरुकुल पद्धति/पाठशाला/पारंपरिक ओरिएंटल लर्निंग सिस्टम (टीओएलएस)/गुरुकुल/शास्त्रपीठ/संस्कृत और संस्कृत ज्ञान प्रणाली पर अंतःविषय अनुसंधान को प्रोत्साहित करता है।**

***Institution encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas/ Interdisciplinary Research on Sanskrit and Sanskrit knowledge system.***

---

- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः गुरुकुलपद्धत्या अध्यापानाय सर्वदैव प्रोत्साहनरं कुरुते। अस्मिन् विश्वविद्यालये गुरुकुलस्य पद्धत्य अधीताश्छात्राः जीवने सर्वत्र सर्वदा च विजयं लब्ध्वा स्वजीवनं कृतकृत्यं कुर्वते।
- अत्र गुरवोऽपि यथावसरं छात्राणां दिनचर्यायाः निरीक्षणं विधाय तान् सर्वदैव सदाचरणाय प्रेरयन्ति येन समाजाय अपि सुयोग्याः नागरिकाः उपलभ्यन्ते।
- अत्र छात्राः विश्वविद्यालयस्य अतिरिक्तसमये गुरुणां गेहेक गत्वा अपि तेषां चरणेषपविश्य अध्ययनं कुर्वन्तीति महती विशेषता।
- कक्षासु छात्रेभ्यः शास्त्राध्ययनेन सहैव व्यावहारिकी विद्या अपि शिक्षयते येन ते समाजे कुत्रचित् गर्हिताः न स्युः।
- शुकनासोपदेशस्य अध्यापनेन छात्राः युवावस्थायां समागतानां दोषाणां विषये विज्ञाय तेभ्य आत्मानम् अपाकर्तुं प्रभतन्ते।
- अत्र अध्ययनं यथा परम्परा तथैव भूमौ कटं प्रसार्य भवति अथ चापि ते छात्राः वेदादीनां शास्त्राणां मूलमपि स्मृत्वा तेषाम् अर्थज्ञानाय प्रयासं कुर्वन्ति।
- विश्वविद्यालयेऽस्मिन् यथानिर्धारितं परीक्षाकालम् अतिरिच्यापि अध्यापकाः छात्राणां मध्ये मध्ये परीक्षणं कृत्वा तेषु गुणाधानं कुर्वन्ति।
- अत्र निर्मितायां यज्ञशालायां विशिष्टयागानां प्रशिक्षणं प्रदाय वैदिकमन्त्राणामपि बहुविधं यथाशास्त्रम् उच्चारणं शिक्ष्यते।
- अत्र अधीताश्छात्राः देशस्य विदेशस्य च विभिन्नासु राष्ट्रीयासु अन्താराष्ट्रीयासु च प्रतियोगितासु भागं गृहीतवा तत्र विजयं प्राप्य विश्वविद्यालयस्य विजयपताकाम् उत्तोलयन्ति।
- अस्त्र विश्वविद्यालयस्य सम्बद्धेषु महाविद्यालयेषु अपि अनमा गुरुकुलपद्धत्या एव सर्वत्र अध्ययनमध्यापनं भवति।
- यथाशास्त्रम् अत्र कर्मकाण्डप्रशिक्षणं ज्योतिषशास्त्रादिप्रशिक्षणं च भवति।
- गुरुकुलरीत्या एव अत्र विश्वविद्यालये गुरुपूर्णिमा व्यासपूजपनम्, सरस्वतीपूजा, गणेशार्चनम्, चेत्यादिकयथावसरं विधिविधानपूर्वकं क्रियते।
- छात्राणाम् इतः अध्ययनं समाज प्रस्थानकाले सौप्रस्थानिकम् अपि दीक्षान्तमहोत्सवः, इति नामहोमेन पारम्परिकरीत्या एव प्रतिवर्षं विधीयते।
- पारम्परिक ग्रन्थानाम् अध्यापनं गुरुकुलपद्धत्या विधीयते किन्तु आधुनिकविषयाणाम् अध्यापनाय समसामयिकी व्यवस्था अपि सम्पूर्णानन्दसंस्कृतविश्वविद्यालये विद्यते।

❖ शास्त्रपरम्पराः सुरक्षायै अस्मिन् विश्वविद्यालये प्रतिमासं वाग्देवीमन्दिरस्य परिसरे वाक्यार्थसभायाः समायोजनं क्रियते यत्र भारतस्य प्रतिष्ठितानां प्रथितयशसाम् अशेषशेमुषी सम्पन्नानां विदुषां वाक्यार्थो भवति।

**अन्तरशास्त्रीयानुसन्धानम्**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमाः अनुसन्धानक्षेत्रे गतिवर्धापकाः तडिस्तारकाश्च निर्मिताः सन्ति। अस्मिन् विश्वविद्यालये शास्त्री/आचार्य/विद्यावारिधिस्तरीयाः पाठ्यक्रमाः सञ्चाल्यन्ते। अत्र अध्याप्यमानाः शास्त्रीयाः विषयाः एते सन्ति –

व्याकरणम्, साहित्य, ज्योतिषम्, सर्वदर्शनम्, धर्मशास्त्रम्, पुराणेतिहासः, वेदः, पौरोहित्यम्, जैनदर्शनम्, बौद्धदर्शनम्, सांख्ययोगः, न्यायः, मीमांसा

**व्याकरणम्**

अत्र सामन्यतस्तु व्याकरणविभागः एव वर्त्तते किन्तु तत्र व्याकरणस्य प्रसिद्धं भागद्वयमपि पृथक्कृत्य पाठ्यते। तच्च भागद्वयं वर्त्तते – 1. प्राचीनव्याकरणम् 2. नव्यव्याकरणम्

**ज्योतिषम्**

व्याकरणविभागेनेव ज्योतिषविभागोऽपि एक एव किन्तु तत्रापि ज्योतिषस्य भागइयं कृत्वा शास्त्राध्ययनं भवति। ज्योतिषस्य अध्याप्यमानं भागत्रयं वर्त्तते –

सिद्धान्तज्योतिषम्, फलितज्योतिषम्, गणितज्योतिषम्

**सर्वदर्शनम्**

अस्मिन् सामान्यतः सर्वेषां दर्शनायां परिचयात्मकम् अध्ययनम् अध्यापनञ्च भवति। एतत् पठित्वा छात्राः सर्वेषां दर्शनानां सामान्यैः सिद्धान्तैः परिचिताः भूत्वा तद्विषये अन्यऽपि पठितुं जिज्ञासवो भवन्ति।

**वेदः**

अत्र वेदविभागे चतुवर्णाम् अपि वेदानाम् अध्यापनं विशेषतया साङ्गोपाङ्गं कार्यते। तत्रापि चतुर्णां वेदानां तत्शाखानां च कृते पृथक् पृथक् अध्यापकाः नियुक्ताः सन्ति। ते सर्वेऽपि स्वविषये निपुणाः वर्तन्ते। अस्माकं शास्त्रेषु निर्दिष्टानां विविधानां यागानां प्रायोगिकं पक्षं दर्शयितुम् अस्मिन्नेव विभागे स्मार्त/श्रौत-यज्ञशाला निर्मिता वर्त्तते यस्यां विशिष्टानां यागानां व्यावहारिकपक्षो दर्श्यते।

**पौरोहित्यम्**

अयं विश्वविद्यालयः पौरोहित्यस्य कर्मकाण्डस्य ददाति यत्रागत्य जिज्ञासवः जिज्ञासानां समाधानं सबल तथैव कर्तुं पारयन्ति।

**न्यायः**

अयं विभागोऽपि सामान्यतस्तु दर्शनविभागो वर्त्तते परन्तु न्यायस्य अध्ययनमत्र भागद्वये विधीयते। तस्य च भागद्वयमिदम्।

1. प्राचीनन्यायः 2. नव्यन्यायः

**मीमांसा**

मीमांसाया अपि द्वौ भागौ स्तः यस्य भागद्वयस्यापि विधिवदध्ययनम् अस्मिन् विभागे भवति। तद् भागद्वयं वर्त्तते –

1. पूर्वमीमांसा 2. उत्तरमीमांसा (वेदान्तः)

एतेषां सर्वेषां पाठ्यक्रमाणां विशेषता इयं वर्त्तते यदिमे समेऽपि पाठ्यक्रमाः अनुसन्धानदृष्ट्या उपयोगिनो वर्त्तते। यद्यपि एषु महत् कार्यम् अद्यावधि अभवऽपि किन्तु विस्तारत्वात् अधुनापि एतेषु बह्वधिकं कार्यं कर्तुं शक्यते।

अन्तःशास्त्रीयानुसन्धानदृष्ट्या अपि एते पाठ्यक्रमाः विशिष्टं स्थानं भजन्ते यतोहि भारतीयज्ञानशाखानां परस्परं भूयान् सम्बन्धो वर्त्तते अतः एतेषु अत्र विश्वविद्यालये काले काले अन्तरशास्त्रीयानुसन्धानाय प्रयासोऽपि क्रियते।